# Shri Raghavendra Mangalamala

# શ્રીરાઘવેન્દ્રમઙ્ગલમાલા

## Document Information

Text title : Raghavendra Mangalamala

File name : rAghavendramangalamAlA.itx

Category : raama, rAmAnanda, mangala, shataka

Location : doc_raama

Author : rAghavAnandAchArya

Latest update : January 22, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 19, 2024

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રમઙ્ગલમાલા

રાઘવેન્દ્રં નમસ્કૃત્ય હર્યાનન્દં ગુરું તથા ।
કુર્વે મઙ્ગલમાલાં શ્રીરાઘવેન્દ્રસ્ય તુષ્ટયે ॥ ૧॥

મઙ્ગલાનાં નિવાસાય જગન્મઙ્ગલકારિણે ।
મઙ્ગલૈકસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨॥

શ્રીજાનકીનિવાસાય શ્રીસાકેતનિવાસિને ।
નિખિલાન્તર્નિવાસાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩॥

સીતાકાન્તાય શાન્તાયાનન્તપાપાન્તકારિણે ।
અનન્તરૂપરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪॥

પ્રપન્નાનન્દદાત્રે ચ પ્રપન્નાર્ત્તિવિનાશિને ।
અવિનાશિસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫॥

વાઞ્છાકલ્પલતારામલોકાભિરામમૂર્ત્તયે ।
સકલાપદ્વિરામાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬॥

સર્વવિદ્યાધિરાધ્યાયાવિદ્યાશૂન્યપરાત્મને ।
વેદવેદ્યાનવદ્યાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭॥

ચિદચિદ્ભ્યાં વિશિષ્ટાય શિષ્ટપક્ષસુરક્ષિણે ।
સચ્ચિદાનન્દરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮॥

બ્રહ્મણે પરિપૂર્ણાય કાર્યકારણરૂપિણે ।
શાર્ઙ્ગિણે પૂર્ણકામાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯॥

ભક્તતન્ત્રસ્વતન્ત્રાય ભક્તાભીષ્ટાર્થદાયિને ।
ભક્ત્યામુક્તિપ્રદાત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦॥

સર્વશક્તિમતે સર્વશેષિણે સર્વવેદિને ।
સર્વસમ્પદ્વિધાત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૧॥

ત્યાજ્યવર્જ્યાય પૂજ્યાયાનન્તશ્રેયોગુણાબ્ધયે ।
સર્વેષાં ચિત્તચૌરાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૨॥

સંહર્ત્રે ચાસ્યવિશ્વસ્ય કર્ત્રે ભર્ત્રે તથૈવ ચ ।
કીર્ત્તનાત્તારયિત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૩॥

દિવ્યદેહાય હૃદ્યાય દિવ્યાલઙ્કારધારિણે ।
દિવ્યપરિકરાયાથ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૪॥

વ્યાપિનેઽન્તર્વહિશ્ચાસ્ય સર્વસ્ય જગતઃ સતે ।
અદ્વિતીયસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૫॥

શ્રીકૌશલ્યાતનૂજાય શ્રીસરયૂવિહારિણે ।
ચક્રવર્ત્તિકુમારાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૬॥

તાડ઼કાઘાતિને વિશ્વામિત્રસ્ય યજ્ઞરક્ષિણે ।
અહિલ્યોદ્ધારકારાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૭॥

જનકારાધિતાયાથ શમ્ભુચાપવિભેદિને ।
જાનકીપરિણેત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૮॥

મિથિલાધિપજામાત્રે મિથિલામોહકારિણે ।
જામદગ્ન્યવિજેત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૯॥

અર્ચિતાય નિષાદેન તીર્થરાજં ગતાય ચ ।
વનવાસેન હૃષ્ટાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૦॥

ચિત્રશક્તિનિધાનાય ચિત્રકૂટવિહારિણે ।
પર્ણશાલાધિવાસાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૧॥

ભરતેનાનુનીતાય પિતુરાદેશકારિણે ।
રક્ષોબધપ્રતિજ્ઞાત્રે રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૨॥

સીતાસૌમિત્રિયુક્તાય ચાપિને બાણિને તથા ।
ખરદૂષણહન્ત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૩॥

મારીચમૃત્યુકારાય શવર્યારાધિતાય ચ ।
મુનીન્દ્રૈર્વિહીતાર્ચાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૪॥

વાનરેન્દ્રસ્ય મિત્રાય બાલિમુક્તિવિધાયિને ।
પ્રવર્ષણાધિવાસાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૫॥

હનુમત્પ્રાર્થિતાયાથ હનુમત્સેવિતાન્ઘ્રયે ।
હનુમત્પ્રેષયિત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૬॥

સીતાશોકવિમુગ્ધાય સીતાન્વેષણકારિણે ।
સીતાયાઃ શોકહર્ત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૭॥

વિભીષણશરણ્યાય સિન્ધૌ સેતુવિધાયિને ॥

ઉલ્લઙ્ઘિતસમુદ્રાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૮॥

યોલઙ્કાધિપસંહારી લઙ્કાં શ્રિતાય યોઽદદાત્ ।
તસ્મૈ લઙ્કાવિજેત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૯॥

શ્રીમતે રઘુવીરાય રણધીરાય ધન્વિને ।
સમાભ્યધિકશૂન્યાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩૦॥

બ્રહ્મશમ્ભુસુરેન્દ્રાદિ સુરશ્રેષ્ઠસ્તુતાય ચ ।
કૃતસીતાપરીક્ષાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩૧॥

મૈથિલીમધિગમ્યાથ પુષ્પકારોહિણે મુદા ।
અયોધ્યાનન્દકર્ત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩૨॥

સ્વામિને કોશલેન્દ્રાય રામરાજ્ય પ્રવર્તિને ।
રાજાધિરાજરાજાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩૩॥

ભૂમિજાવલ્લભાયાથ ભૂમિનાથાય ધર્મિણે ।
દાનિને સાર્વભૌમાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩૪॥

લોકાભિરામરૂપાય લોકાભિરામકર્મણે ।
લોકાભિરામભાવાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩૫॥

સીતાશોભિતવામાય સીતાચિત્તવિનોદિને ।
સીતાયાઃ પ્રાણરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩૬॥

જનાનાં સ્વાનુરક્તાનામયોધ્યાવાસિનાં સતામ્ ।
મોક્ષપ્રદાનકર્ત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩૭॥

વિપરિતેષુ કાલેષુ ક્ષીણબન્ધોશ્ચ બન્ધવે ।
સર્વસ્વાય સ્વભક્તાનાં રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩૮॥

કપ્યાસપુણ્ડરીકાક્ષપીતકૌશેય વાસસે ।
મેઘશ્યામાભિરામાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૩૯॥

અનાથાનાઞ્ચ નાથાય ધર્મગોદ્વિજરક્ષિણે ।
જગદ્ધિતાય રામાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪૦॥

સમુદ્ધારાય વેદાનાં સ્વસ્વરૂપનિવેદિનામ્ ।
ધૃતમત્સ્યસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪૧॥

દેવેભ્યોઽમૃતદાનાય મન્દરાચલધારિણે ।
કૂર્માવતારરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪૨॥

વિશ્વમ્ભરાં સમુદ્ધર્તું દૈત્યેનમલિનીકૃતામ્ ।
ધૃતવારાહરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪૩॥

પ્રહ્લાદં ચ પિતુસ્ત્રાસાદ્ ગોપિત્વાહ્લાદકારિણે ।
નરસિંહસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪૪॥

છલયિત્વા બલિં ભૂયોદેવરાજ્યં પ્રવર્તિતુમ્ ।
ધૃતવામનરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪૫॥

ક્ષિતિ ક્ષત્રક્ષયં કૃત્વા બ્રાહ્મણેભ્યઃ સમર્પિણે ।
જામદગ્ન્યસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪૬॥

સાધૂનાઞ્ચ પરિત્રાત્રે સંહાર્યં દુષ્ટરાક્ષસાન્ ।
દાશરથિસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪૭॥

વંશ્યાલોકમનો હર્ત્રે ગીતયાઽજ્ઞાનહારિણે ।
ધૃતકૃષ્ણસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪૮॥

દેવદ્વિષોઽથ સમ્મોહ્ય શ્રૌતધર્મસ્ય ગુપ્તયે ।
ધૃતબુદ્ધસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૪૯॥

કલૌ કલિ વિનાશ્યાથ કૃતધર્મપ્રવર્ત્તિને ।
ધૃતકલ્કિસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫૦॥

સર્વેષામવતારાણાં મૂલાય પરમાત્મને ।
વિભૂતિમૃતલોકાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫૧॥

અણોરણીયસે તદ્વન્મહતોઽપિમહીયસે ।
સર્વાનુશાસ્તિકારાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫૨॥

આદિત્યતુલ્યવર્ણાય તમસઃ પારવર્તિને ।
કવયેઽચિન્ત્યરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫૩॥

સર્વહૃત્સન્નિવિષ્ટાય સ્મૃત્યુત્પાદવિનાશિને ।
વેદકૃદ્વેવવન્દ્યાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫૪॥

નમતાં સ્વમનસ્કાનાં સ્વભક્તાનાં સ્વયાજિનામ્ ।
સ્વપ્રાપ્તિઃ કુર્વતે નિત્યાં રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫૫॥

ઉત્પત્તિધ્વંસશૂન્યાય મૃત્યોરપ્યથ મૃત્યવે ।
અપરિચ્છિન્નરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫૬॥

સત્યસ્ય વર્મણે લોકશર્મણેઽક્લિષ્ટકર્મણે ।
વર્જ્યાયક્લેશકર્માભ્યાં રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫૭॥

સત્યપ્રિયાય સત્યાય સત્યકૃત્સત્યવેદિને ।
સત્યવિશ્વનિદાનાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫૮॥

અશરણ્યશરણ્યાય દેવદેવાય વેધસે ।
વ્યક્તષાડ્ગુણ્યચેષ્ટાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૫૯॥

સર્વવિશ્વનિયન્ત્રે ચ પરમૈશ્વર્યશાલિને ।
સૌલભ્યગુણયુક્તાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬૦॥

સર્વેભ્યોઽભયદાત્રે ચ સકૃદેવપ્રપત્તિતઃ ।
ઉપેયોપાયરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬૧॥

રામેતિ કીર્ત્તિતે ચાપિ યમદૂતૌઘતર્જિને ।
ભર્જિત્રેભવબીજાનાં રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬૨॥

ભયાભયવિધાતારઃ સર્વે યચ્છાસને સ્થિતાઃ ।
તસ્મૈ હિ નિખિલેશાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬૩॥

અભયં પ્રીણનાદ્યસ્ય ભયં યસ્યાવધીરણાત્ ।
તસ્મૈ ભગવતેનિત્યં રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬૪॥

યસ્યાનન્દવિદેભીતિર્વિદ્યતે ન કુતશ્ચન ।
તસ્મા આનન્દયુક્તાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬૫॥

પ્રાણાનાં પ્રાણરૂપાય જ્યોતિષાં જ્યોતિષે તથા ।

સૂર્યાન્તર્વાસશીલાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬૬॥

નિત્યાનામપિ નિત્યો યશ્ચેતનાનાઞ્ચ ચેતનઃ ।
તસ્મૈ કામપ્રદાત્રે હિ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬૭॥

ચિદચિત્તત્ત્વદેહાય ચિદચિદ્વ્યાપિને તથા ।
ચિદચિત્તત્ત્વભિન્નાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬૮॥

સહસ્રબાહુપાદાય સહસ્રશિરસે તથા ।
સહસ્રાનનનેત્રાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૬૯॥

મૂર્ત્તામૂર્ત્તસ્વરૂપાય તથૈકાનેકમૂર્તયે ।
દૂરાદૂરસ્થિતાયાથ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭૦॥

ભવસન્તાપસન્તપ્તજનાનાં ખિન્નચેતસામ્ ।
કટાક્ષામૃતદાત્રે ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭૧॥

દેહસૌન્દર્યસમ્પત્ત્યા સર્વલોકનિવાસિનામ્ ।
સુતરાં મોહકારાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭૨॥

રમન્તે યોગિનો યસ્મિન્ સત્યાનન્દે ચિદાત્મનિ ।
તસ્મૈ સર્વાભિરામાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭૩॥

સત્વાદિગુણશૂન્યત્વાન્નિર્ગુણાય મહાત્મને ।
સદ્ગુણૈઃ સગુણાયાપિ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭૪॥

સર્વાર્ચનાર્ચનીયાય સર્વેભ્યઃ ફલદાયિને ।
સર્વવાચકવાચ્યાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭૫॥

વેદે રામાયણે ચૈવ પુરાણે ભારતે તથા ।
પાઞ્ચરાત્રે ચ ગીતાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭૬॥

નિગમૈર્મેધયા ચાપિ તપસા યો ન લભ્યતે ।
તસ્મૈ ભક્ત્યેકલભ્યાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭૭॥

કર્માદ્યપરતન્ત્રાય પૂર્ણષાડ્ગુણ્યમૂર્તયે ।
અચ્યુતાયાવિકારાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭૮॥

શશ્વદ્ ભક્તસમૂહસ્ય સદ્યોગક્ષેમવાહિને ।
પ્રધાનપુરુષેશાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૭૯॥

પુરુષાયોત્તમાયાથ ક્ષરાક્ષરપરાય ચ ।
પરમાત્માભિધાનાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮૦॥

યોગિનાં ધ્યેયવન્દ્યાય જ્ઞેયાય ભવહારિણે ।
મહાપુરુષસંજ્ઞાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮૧॥

વિષ્ણવે વિવુધારાતિજિષ્ણવે પ્રભવિષ્ણવે ।
સર્વલોકૈકનાથાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮૨॥

જગતો ગુરવે સર્વજગદ્વન્દ્યાય ધર્મિણે ।
અમોઘાયુધવૃન્દાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮૩॥

વિજ્ઞાનદાનશીલાય પૂર્ણવિજ્ઞાનશાલિને ।
વિજ્ઞાનઘનરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮૪॥

દૈવતાય ચ દેવાનાં શ્રુતીનાં દિવ્યચક્ષુષે ।
યોગનેત્રાઞ્જનાયાથ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮૫॥

અપાદાયોરૂપાદાયાપાણયે ચોરૂપાણયે ।
અનેત્રાયોરુનેત્રાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮૬॥

અકર્ણાયોરુકર્ણાય હ્યદેહાયોરુદેહિને ।
અરુપાયોરુરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮૭॥

લોકૈકસેતવે તદ્વત્ સર્વલોકૈકહેતવે ।
સેતવેભવપાથોધે રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮૮॥

ભવન્ત્યાનન્દિનો જીવા યં રસં પ્રાપ્ય શાશ્વતમ્ ।
તસ્મૈ રસસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૮૯॥

સસુરસ્ય સુરેન્દ્રસ્યાસુરાણાં બ્રહ્મશૂલિનોઃ ।
આરાધ્યાય નરાણાઞ્ચ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯૦॥

પ્રાણાય વૈષ્ણવાનાઞ્ચ ચિન્તયિત્રે ચ કૂર્મવત્ ।
કલ્પપાદપરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯૧॥

નૃત્યતિ નિખિલં વિશ્વં યન્માયાવશગં સદા ।
તસ્મૈ ચાદ્ભુતમાયાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯૨॥

તીર્યતે યત્પ્રપત્ત્યાહિ દૈવી માયા દુરત્યયા ।
તસ્મૈ શરણ્યવર્યાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯૩॥

યં ભજન્ સુદુરાચારઃ પુરુષશ્ચૈતિ સાધુતામ્ ।
અધમોદ્ધારિણે તસ્મૈ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯૪॥

યસ્ય સ્મરણમાત્રેણ બાહ્યાભ્યન્તઃ શુચિર્ભવેત્ ।
શુચીનાં શુચયે તસ્મૈ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯૫॥

યસ્ય કીર્તનમાત્રેણ ન્યૂનમાયાતિ પૂર્ણતામ્ ।
તસ્મૈ પૂર્ણસ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯૬॥

યત્સેવા મોક્ષસૌધસ્યાકણ્ટકા રાજપદ્ધતિઃ ।
તસ્મૈ સેવ્યવરેણ્યાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯૭॥

સૃષ્ટે વિશ્વે પ્રવિશ્યાથ નામરૂપવિભાજિને ।
તતઃ પ્રાક્ સત્સ્વરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯૮॥

તોષયિત્રે ચકોરાણાં ભક્તાનાં મૂર્તિરશ્મિભિઃ ।
ચન્દ્રાય રામચન્દ્રાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૯૯॥

સર્વધર્માન્ પરિત્યજ્ય શરણાગતભાવતઃ ।
મોચયિત્રે ચ પાપેભ્યો રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦૦॥

ભાસયિત્રે ચ ભાન્વાદેર્ભાનુકોટિપ્રભાવતે ।
સ્વયમ્પ્રકાશરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦૧॥

સમષ્ટિસૃષ્ટિકરાય વ્યષ્ટિસૃષ્ટિવિધાયિને ।
વિરિઞ્ચ્યાદ્યાત્મરૂપાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦૨॥

વિશ્વાતીતાય વિશ્વાય યં માયા નાતિવર્તતે ।
માયાધિષ્ઠાયિને તસ્મૈ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦૩॥

નિરાધારાય શક્તાય સર્વાધારાય મોદિને ।
સ્વેમહિમ્નિસ્થિતાયાથ રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦૪॥

ધર્માર્થકામમોક્ષાખ્યપુરુષાર્થપ્રદાયિને ।
અદ્વિતીયવદાન્યાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦૫॥

સંયુગે જાતરોષં યં બિભ્યતિ વિવુધાદિકાઃ ।
તસ્મૈ તેજોનિધાનાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦૬॥

ચારિત્રેણ ચ યુક્તાય સર્વભૂતહિતાય ચ ।

જિતક્રોધાનસૂયાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦૭॥

કથઞ્ચિદુપકારેણ કૃતેનૈકેન તુષ્યતે ।
ધર્મજ્ઞાય કૃતજ્ઞાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦૮॥

ન સ્મરત્યાત્મવત્ત્વેન યોઽપરાધશતં કિલ ।
તસ્મૈ ક્ષમાસમુદ્રાય રાઘવેન્દ્રાય મઙ્ગલમ્ ॥ ૧૦૯॥

આચાર્યસાર્વભૌમ શ્રીરાઘવાનન્દનિર્મિતા ।
ભૂયાન્મઙ્ગલમાલેયં લોકમઙ્ગલકારિણી ॥ ૧૧૦॥

ઇતિ દુર્વાદધ્વાન્તમાર્ત્તણ્ડ જગદ્ગુરુ શ્રીરાઘવાનન્દાચાર્ય
સિદ્ધસંરાટ્ પ્રણીતા શ્રીરાઘવેન્દ્રમઙ્ગલમાલા સમાપ્તા ।

(શ્રીરાઘવાનન્દાચાર્યશતાબ્ધ્યા શ્રીરાઘવાનન્દાચાર્યોપદિષ્ટઃ પ્રબન્ધઃ)

Proofread by Mrityunjay Pandey

---

*Shri Raghavendra Mangalamala*

pdf was typeset on February 19, 2024

Please send corrections to *sanskrit@cheerful.com*